श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ पञ्चत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चत्रिंशः सर्गः ॥

## माल्यवता रावणस्य श्रीरामेण सह सन्धिकरणाय प्रबोधनम्

तेन शङ्खविमिश्रेण भेरीशब्देन नादिना।
उपयाति महाबाहू रामः परपुरञ्जयः॥ **6.35.1** ॥

तं निनादं निशम्याथ रावणो राक्षसेश्वरः।
मुहूर्तं ध्यानमास्थाय सचिवानभ्युदैक्षत॥ **6.35.2** ॥

अथ तान् सचिवांस्तत्र सर्वानाभाष्य रावणः।
सभां सन्नादयन् सर्वामित्युवाच महाबलः॥ **6.35.3** ॥

जगत्सन्तापनः क्रूरोऽगर्हयन् राक्षसेश्वरः।
तरणं सागरस्यास्य विक्रमं बलपौरुषम्॥ **6.35.4** ॥

यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम्।
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान्।
तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम्॥ **6.35.5** ॥

ततस्तु सुमहाप्राज्ञो माल्यवान् नाम राक्षसः।
रावणस्य वचः श्रुत्वा इति मातामहोऽब्रवीत्॥ **6.35.6** ॥

विद्यास्वभिविनीतो यो राजा राजन् नयानुगः।
स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे॥ **6.35.7** ॥

सन्दधानो हि कालेन विगृह्णंश्चारिभिः सह।
स्वपक्षे वर्धनं कुर्वन्महदैश्वर्यमश्नुते॥ **6.35.8** ॥

हीयमानेन कर्तव्यो राज्ञा सन्धिः समेन च।
न शत्रुमवमन्येत ज्यायान् कुर्वीत विग्रहम्॥ **6.35.9** ॥

तन्मह्यं रोचते सन्धिः सह रामेण रावण।
यदर्थमभियुक्तोऽसि सीता तस्मै प्रदीयताम्॥ **6.35.10** ॥

तस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः।
विरोधं मा गमस्तेन सन्धिस्ते तेन रोचताम्॥ **6.35.11** ॥

असृजद् भगवान् पक्षौ द्वावेव हि पितामहः।
सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ॥ **6.35.12** ॥

धर्मो हि श्रूयते पक्ष अमराणां महात्मनाम्।
अधर्मो रक्षसां पक्षो ह्यसुराणां च राक्षस॥ **6.35.13** ॥

धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम्।
अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते॥ **6.35.14** ॥

तत् त्वया चरता लोकान् धर्मोऽपि निहतो महान्।
अधर्मः प्रगृहीतश्च तेनास्मद् बलिनः परे॥ **6.35.15** ॥

स प्रमादात् प्रवृद्धस्तेऽधर्मोऽहिर्ग्रसते हि नः।
विवर्धयति पक्षं च सुराणां सुरभावनः॥ **6.35.16** ॥

विषयेषु प्रसक्तेन यत्किञ्चित्कारिणा त्वया।
ऋषीणामग्निकल्पानामुद्वेगो जनितो महान्॥ **6.35.17** ॥

तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः।
तपसा भावितात्मानो धर्मस्यानुग्रहे रताः॥ **6.35.18** ॥

मुख्यैर्यज्ञैर्यजन्त्येते तैस्तैर्यत्ते द्विजातयः।
जुह्वत्यग्नींश्च विधिवद् वेदांश्चोच्चैरधीयते॥ **6.35.19** ॥

अभिभूय च रक्षांसि ब्रह्मघोषानुदीरयन्।
दिशो विप्रद्रुताः सर्वाः स्तनयित्नुरिवोष्णगे॥ **6.35.20** ॥

ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः।
आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश॥ **6.35.21** ॥

तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः।
चर्यमाणं तपस्तीव्रं सन्तापयति राक्षसान्॥ **6.35.22** ॥

देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया।
मनुष्या वानरा ऋक्षा गोलाङ्गूला महाबलाः।
बलवन्त इहागम्य गर्जन्ति दृढविक्रमाः॥ **6.35.23** ॥

उत्पातान् विविधान् दृष्ट्वा घोरान् बहुविधान् बहून्।
विनाशमनुपश्यामि सर्वेषां रक्षसामहम्॥ **6.35.24** ॥

खराभिस्तनिता घोरा मेघाः प्रतिभयङ्कराः।
शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः॥ **6.35.25** ॥

रुदतां वाहनानां च प्रपतन्त्यश्रुबिन्दवः।
रजोध्वस्ता विवर्णाश्च न प्रभान्ति यथापुरम्॥ **6.35.26** ॥

व्याला गोमायवो गृध्रा वाश्यन्ति च सुभैरवम्।
प्रविश्य लङ्कामारामे समवायांश्च कुर्वते॥ **6.35.27** ॥

कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः।
स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च॥ **6.35.28** ॥

गृहाणां बलिकर्माणि श्वानः पर्युपभुञ्जते।
खरा गोषु प्रजायन्ते मूषका नकुलेषु च॥ **6.35.29** ॥

मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह।
किन्नरा राक्षसैश्चापि समेयुर्मानुषैः सह॥ **6.35.30** ॥

पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः।
राक्षसानां विनाशाय कपोता विचरन्ति च॥ **6.35.31** ॥

चीचीकूचीति वाशन्त्यः शारिका वेश्मसु स्थिताः।
पतन्ति ग्रथिताश्चापि निर्जिताः कलहैषिभिः॥ **6.35.32** ॥

पक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रुदन्ति ते।
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः॥ **6.35.33** ॥

कालो गृहाणि सर्वेषां काले कालेऽन्ववेक्षते।
एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च॥ **6.35.34** ॥

विष्णुं मन्यामहे रामं मानुषं रूपमास्थितम्।
नहि मानुषमात्रोऽसौ राघवो दृढविक्रमः॥ **6.35.35** ॥

येन बद्धः समुद्रे च सेतुः स परमाद्भुतः।
कुरुष्व नरराजेन सन्धिं रामेण रावण।
ज्ञात्वावधार्य कर्माणि क्रियतामायतिक्षमम्॥ **6.35.36** ॥

इदं वचस्तस्य निगद्य माल्यवान्
परीक्ष्य रक्षोधिपतेर्मनः पुनः।
अनुत्तमेषूत्तमपौरुषो बली
बभूव तूष्णीं समवेक्ष्य रावणम्॥ **6.35.37** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चत्रिंशः सर्गः॥